# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2022-23

## SANACOR07T-SANSKRIT (CC7)

Time Allotted: 2 Hours

Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः

1. अधोलिखितेषु विषयेषु <u>यथेच्छमेकमाश्रित्य</u> संस्कृतेन देवनागरलिप्या च लघुप्रबन्धो विरच्यताम्। 5×1 = 5

(क) धर्मशास्त्रेषु मानवानां साधारणधर्मविषयः निरूप्यताम्।

(ख) सूत्रसाहित्येषु प्रतिबिम्बिता समाजव्यवस्था।

अथवा

अधोलिखितेषु श्लोकेषु <u>यथेच्छमेकः</u> संस्कृतेन देवनागरलिप्या च व्याख्येयः। 5×1 = 5

(क) वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्॥

(ख) ब्राह्मण्यक्षत्रियविशां शूद्राणाञ्च परन्तपः।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥

2. अधः प्रदत्तेषु प्रश्नेषु यथेच्छं <u>पञ्च</u> प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) मनोः नये धर्मस्य किं लक्षणम् ? कति च स्थानानि सन्ति ?

(ख) याज्ञवल्क्यनये किं धर्ममूलम् ?

(ग) सूत्रसाहित्यं कतिविधम् ? कानि च तानि ?

(घ) समाजस्य लक्षणं किम् ?

(ङ) कस्तावत् आश्रमधर्मः ?

(च) अस्तेयं नाम किम् ? को नाम 'दमः' ?

(छ) को निमित्तधर्मः ? को वा साधारणधर्मः ?

### ख-विभागः

3. <u>यथेच्छमेकः</u> प्रश्नः संस्कृतेन देवनागरलिप्या च समाधेयः। 10×1 = 10

(क) प्राचीनभारतवर्षस्य आश्रमचतुष्टयमाश्रित्य एकः लघुबन्धः विरच्यताम्।

(ख) महाभारतस्य शान्तिपर्वणि वर्णसंकरजातानाम् अनार्यजातीनां यद् वर्णनं कृतं तत् समासेन वर्ण्यताम्।

4. प्रसङ्गोल्लेखपूर्वकं यथेच्छमेकस्य संस्कृतेन देवनागरलिप्या च व्याख्या कार्या। 5×1 = 5

(क) रत्नानि विभूषयन्ति योषा भूण्यन्ते वनिता न रत्नकान्त्या।
चेतो वनिता हरन्त्यरत्ना नो रत्नानि विनाङ्गनाङ्गसंगम्॥

(ख) अहिंसा सत्यमक्रोधो वृत्तिदायानुपालनम्।
भरणं पुत्रदाराणां शौचमद्रोह एव च॥

अथवा

अधोलिखितेषु यथेच्छमेकमाश्रित्य टिप्पणी लेख्या। 5×1 = 5

(क) त्रिवर्गः, (ख) पुरुषार्थः, (ग) जीवन्मुक्तिः।

## ग-विभागः

5. यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) अथर्ववेदीयसभाविषयकं सूक्तमवलम्व्य वैदिकयुगे सभायाः स्वरूपम् लिखत।

(ख) शुक्रनीत्यनुसारेण नीतिशास्त्रस्य श्रेष्ठत्वं प्रतिपाद्यताम्।

6. यथेच्छं द्वितयस्य संस्कृतेन देवनागरलिप्या च टीकां लिखत। 5×2 = 10

(क) विदथः, (ख) विशः, (ग) जनपदः, (घ) रत्नी।

अथवा

अधः प्रदत्तेषु श्लोकेषु यथेच्छं द्वयं प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरलिप्या च व्याख्येयम्। 5×2 = 10

(क) कार्य्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च तत्त्वतः।
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः॥

(ख) अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः॥

(ग) सत्याग्रही सत्यपरः परेषां
दुःखानि सञ्चिन्तयन्ति प्रबुद्धः।
शान्तः सदा चैव मृदु रिपुभ्यो
नान्यायकार्यं सहते तु तेषाम्॥

——×——